

# ॥ श्रीसूक्तम् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।

यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोधिनीम् ।

श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम् ॥

कां सोस्मितां हिरण्यप्राकाराम् आर्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।

पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।

तां पद्मिनीमीं शरणमहं प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।

तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।

अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥
ईश्वरीग्ं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
आप सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ॥
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्म–दळायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥
महादेव्यै च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

# || śrī sūktam ||



hiraṇyavarṇāṁ hariṇīṁ suvarṇa-rajatasrajām |

candrāṁ hiraṇmayīṁ lakṣmīṁ jātavēdō ma āvaha ||

tāṁ ma āvaha jātavēdō lakṣmīm-anapagāminīm |

yasyāṁ hiraṇyaṁ vindēyaṁ gāmaśvaṁ puruṣānaham ||

aśvapūrvāṁ ratha-madhyāṁ hastināda-prabōdhinīm |

śriyaṁ dēvīm-upahvayē śrīrmā dēvī-juṣatām ||

kāṁ sōsmitāṁ hiraṇya-prākārām ārdrāṁ jvalantīṁ tṛptāṁ tarpayantīm |

padmēsthitāṁ padmavarṇāṁ tāmihōpahvayē śriyam ||

candrāṁ prabhāsāṁ yaśasā jvalantīṁ śriyaṁ lōkē dēva-juṣṭāmudārām |

tāṁ padminīmīṁ śaraṇam-ahaṁ prapadyē-ऽalakṣmīrmē naśyatāṁ tvāṁ vṛṇē ||

ādityavarṇē tapasōऽdhijātō vanaspatistava vṛkṣōऽtha bilvaḥ |

tasya phalāni tapasā nudantu māyāntarāyāśca bāhyā alakṣmīḥ ||

upaitu māṁ dēvasakhaḥ kīrtiśca maṇinā saha |

prādurbhūtōऽsmi rāṣṭrēऽsmin kīrtimṛddhiṁ dadātu mē ||

kṣutpipāsāmalāṁ jyēṣṭhām-alakṣmīṁ nāśayāmyaham |

abhūtimasamṛddhiṁ ca sarvāṁ nirṇuda mē gṛhāt ||

gandhadvārāṁ durādharṣāṁ nityapuṣṭāṁ karīṣiṇīm |

īśvarīgṁ sarva-bhūtānāṁ tāmihōpahvayē śriyam ||

manasaḥ kāmamākūtiṁ vācaḥ satyamaśīmahi |

paśūnāṁ rūpamannasya mayi śrīḥ śrayatāṁ yaśaḥ ||

kardamēna prajābhūtā mayi saṁbhava kardama |

śriyaṁ vāsaya mē kulē mātaraṁ padma-mālinīm ||

āpa sṛjantu snigdhāni ciklīta vasa mē gṛhē |

nica dēvīṁ mātaraṁ śriyaṁ vāsaya mē kulē ||

ārdrāṁ puṣkariṇīṁ puṣṭiṁ suvarṇāṁ hēma-mālinīm |

sūryāṁ hiraṇmayīṁ lakṣmīṁ jātavēdō ma āvaha ||

ārdrāṁ yaḥ kariṇīṁ yaṣṭiṁ piṅgalāṁ padma-mālinīm |

candrāṁ hiraṇmayīṁ lakṣmīṁ jātavēdō ma āvaha ||

tāṁ ma āvaha jātavēdō lakṣmīm-anapagāminīm |

yasyāṁ hiraṇyaṁ prabhūtaṁ gāvō dāsyō'śvān-vindēyaṁ puruṣānaham ||

padmapriyē padmini padma-hastē padmālayē padma-daḷāyatākṣi |

viśvapriyē viṣṇu-manō'nukūlē tvatpāda-padmaṁ mayi sannidhatsva ||

mahā-dēvyai ca vidmahē viṣṇu-patnī ca dhīmahi | tannō lakṣmīḥ pracōdayāt ||

ōm̐ śāntiḥ śāntiḥ śāntiḥ ||